**ततो जग्राह शूलं स कोपादरुणलोचनः ॥**

(मं० ८ ॥ श्लो० ७ ॥)

तस्या इति । नृपस्य पितुः, नन्दयतीति नन्दनः तत्संबोधने । तस्या देव्याः भुजं प्राप्य खड्गः चिक्षुरप्रयुक्तः पफाल विशीर्णो बभूव । त्रिफला विशरणे परस्मैपदी कर्तरि लिट् । यद्वा नृपं नन्द-यतीति नृपनन्दः । कर्मण्यण् । नृपनन्देत्येतावत्संबोधनम् । नेति पृथक्पदम् । तथा च खड्गः न पफाल । स्वीयासु क्रियासु निष्पत्तिं नाकरोदित्यर्थः । एवं च फलनिष्पत्तौ परस्मैपदी । ततः क-र्त्तरि लिटि रूपम् । ततः खड्गभङ्गानन्तरम् । कोपात् क्रुद्धत इति अरुणे अव्यक्तरागे । अर्त्तेरुनन् । ते लोचने यस्य सः । चिक्षुरः । शूलयतीति शूलं त्रिशूलम् । जग्राह उपाददे । अरुणोऽव्यक्तरागेऽर्के संध्यारागेऽर्कसारथाविति कोशः । अस्त्री शूलं रुगायुधमिति द्विलिङ्गविधानाच्छूलमिति पाठे न दोषः ॥ ७ ॥

**चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः ॥**
**जाज्वल्यमानं तेजोभी रविबिम्बमिवाम्बरात् ॥**

(मं० ६ ॥ श्लो० ८ ॥)

ध्येकाक्षरवत् । एवं च 'ते' इति सप्तम्यन्तमेवावश्यकमिति वाच्यम्, कोशे अकारस्योच्चारणार्थत्वेन हलामेव तत्तदर्थाभिधायित्वात् । हल्समुदायस्य तत्तदर्थाभिधायित्वे कारप्रत्ययसङ्गतेश्च । वर्णमात्रात्कारप्रत्ययविधानाददिति पुष्पाञ्जलिकाराः । युयुधाते इत्यत्र प्रगृह्यत्वाभावश्छान्दस इति नागेशः । नागो गजस्तस्मान्महीं पृथिवीं युयुधाते अतिसंरब्धावित्यत्र। प्रगृह्यसंज्ञायां सत्यामपि छन्दोभङ्गभयेन नाकारस्य पृथक् श्रवणम् । मणीवादित्वात्प्रगृह्यसंज्ञाभावाद्वा । अतिसंरब्धौ क्रोधातिशययुक्ताविति रामाश्रमः । नागात् गजात् युयुधातेऽतिसंरब्धावित्यत्र संधिरार्षः । अवयवानां समुदायार्थमत्र वीजम् । अत एव भागुरिरवाप्योरल्लोपमाह । अवाप्योरुदाहरणपरिगणने तु धिपणेति न सिध्येदित्याशयः । मणीवादित्वं वा कल्प्यमिति दंशोद्धारकृत् ॥ १४ ॥

**ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा ॥**
**करप्रहारेण शिरश्चामरस्य पृथक्कृतम् ॥**

( मं० १६ ॥ श्लो० १५ ॥ )

तत इति । युद्धरसावेशेन वेगात् जवात् खमन्तारिक्षं उत्पत्य उत्प्लुत्य पुनर्वेगान्निपत्य च मृगाणामरिणा सिंहेन चामराख्यस्य महिपसेनापतेः शिरः करस्य प्रहारेण चपेटया कायात् पृथक् भिन्नं कृतम् । छिन्नमित्यर्थः । अत्र यद्यपि मृगारिपदं सिंहस्य न तादृङ्महत्त्वसूचकं तथापि चामरस्येति चमरीप्रयुक्तकाभासपरस्य हनने चमत्कारावहं भवत्येवेति ज्ञेयम् । खमिति खन्यते इति खम् । खनु अवदारणे डः । खर्वत्यस्मिन्वा खम् । खर्व गतौ डः । खं खः संविदि व्योम्नि चेन्द्रिये । शून्ये बिन्दौ सुखे खस्तु सूर्ये इति हैमः । प्रवाहजवयोर्वेगो विण्मूत्रातिप्रवर्तने इति कोशान्तरम् ॥१५॥

चर्मेत्यमरः । ततः पुरुषच्छेदानन्तरं स महिषः महान् गजः हस्ती मायया बभूवेत्यन्वयः ॥ ३० ॥

करेण च महासिंहं तं चकर्ष जगर्ज च ॥
कर्षतस्तु करं देवी खड्गेन निरकृन्तत ॥
( मं० ३२ ॥ श्लो० ३१ ॥ )

करेणेति । चः पुनरर्थे । कीर्यते अनेनेति करो हस्तः शुण्डादण्डः । कृ विक्षेपे । ऋदोरप् । बलिहस्तांशवः करा इत्यमरः । तेन तं महान्तं सिंहं चकर्ष आकृष्टवान् । जगर्ज बृंहितं चकारेत्यर्थः । गर्ज शब्दे भ्वादिः परस्मैपदी कर्त्तरि लिट् । निरकृन्तत् अ इति छेदः । वृद्धिरादैच् इत्यत्र भत्वात्कुत्वाभाव इव प्रकृतेऽपि भत्वाज्जश्त्वाभावः । छान्दसत्वात् । अकारश्च निषेधार्थः । अमानोना प्रतिषेध इत्यभिधानात् । तथा च सिंहं कर्षतो मायागजस्य करं शुण्डादण्डं तु देवी खड्गेन अ न निरकृन्तत् । निःशेषेण करं न चिच्छेद । अपि तु स्वल्पमेवेत्यर्थः । कृती छेदने तौदादिकः परस्मैपदी इति पुष्पाञ्जलिः । अत्र नागेशस्तु महासिंहं देवीवाहनं चकर्ष तं सिंहमिति निरकृन्ततेति छान्दसमाह । करेण शुण्डादण्डेन देवी तं वाहनत्वेन प्रसिद्धं सिंहं कर्षतो गजस्य करं निरकृन्तत चिच्छेद कर्मव्यतिहारे आत्मनेपदमिति रामाश्रमः । दंशोद्धारकृत्तु अकृन्तत कृती छेदने परस्मैपदत्वेनापि तङ् आर्ष इत्याह ॥ ३१ ॥

ततो महासुरो भूयो माहिषं वपुरास्थितः ॥
तथैव क्षोभयामास त्रैलोक्यं सचराचरम् ॥
( मं० ३३ ॥ श्लो० ३२ ॥ )

तत इति । तत इति ल्यब्लोपे पञ्चमी । असाधकं गजरूपमपहृत्येत्यर्थः । महासुरः । महिषस्येदं माहिषं वपुः शरीरम् ।

मभिलपितं वस्तु वर्त्तते तत्सर्वं वस्तु अस्मत्तः सकाशाद्व्रियतां प्रार्थ्यताम् । अस्मत्त इति अस्मदिति पञ्चमी वहुवचनान्तस्यास्मदः पञ्चम्यास्तसिलादेशे अस्मत्त इति रूपं समञ्जसम् ॥

## देवा ऊचुः ॥ मं० ३३ ॥

इति पूर्वोक्तं देवीवाक्यमाकर्ण्य देवा इन्द्रादयः स्वाभिमत-
प्रकाशनाय देवीमुत्तरवाक्यमूचुरिति ।

**भगवत्या कृतं सर्वं न किञ्चिदवशिष्यते ॥**

( मं० ३४ ॥ श्लो० २९ ॥ )

**यदयं निहतः शत्रुरस्माकं महिषासुरः ॥**

भगवत्या इति । ऐश्वर्यादिषडर्थवत्या त्वया यद्यस्मादयं संनिकृष्टः महिषासुरः निहतः विगतप्राणः कृतः । ततः भगवत्या सर्वमस्माकं प्रयोजनं कृतमेव । अतः किञ्चित्किमपि प्रयोजनं नावशिष्यते । नावशिष्टमस्तीत्यर्थः । न कोऽपि शत्रुः संप्रत्यवशिष्ट इति ॥२९॥

संप्रति शत्रोरभावाद्भाविशत्रुपराजयं प्रार्थयन्ते—

**यदि चापि वरो देयस्त्वयास्माकं महेश्वरि ॥**

( मं० ३५ ॥ श्लो० ३० ॥ )

**संस्मृतासंस्मृता त्वं नो हिंसेथाः परमापदः ॥**

यदीति । च एवार्थः । हे महेश्वरि रुद्रपत्नि, यदि त्वया वरइष्टं देय एव । अस्मभ्यमिति शेषः । तदा सम्यक् स्मृता चिन्तिता असंस्मृता न चिन्तिता वा अस्माकमापदः विपदः परं केवलं हिंसेथाः । हिंसायाः हिंसेः हन्या इत्यर्थः । अत्र हिंसि हिंसायामिति चौरादिः । कण्ड्वादेरहृत्करणात्पक्षे शपि प्रार्थनायां लिङि परस्मैपदित्वात्परस्मैपदे प्राप्ते व्यत्ययो वहुलमित्यात्मनेपदं व्यत्यये मध्यमपुरुषैकवचने थासः सीयुटि रूपं हिंसेथा इति । हिंसीथा इति

तावितिं। तौ शुम्भनिशुम्भौ सूर्यस्य भावः सूर्यता। सूर्याधिकारमिति यावत्। चक्राते विदधाते। कामरूपत्वान्सूर्यरूपतां शिश्रियाते इत्यर्थः। तद्वत्सूर्याधिकारहरणवत्। इन्दोरिदमैन्दवं चन्द्रसंबन्धिनमधिकारम्। तथा कुत्सितं वेरं शरीरमस्येति कुवेरो यक्षराट् तस्येदं कौवेरमधिकारं धनाध्यक्षरूपताम्। अथानन्तरं यमस्येदं यामं तस्येदमित्यण्। याममेव याम्यम्। चतुर्वर्णादित्वात्स्वार्थे ष्यञ्। याम्यं यमसंबन्धि अधिकारम्। चः पुनरर्थे। अनन्तरं वरुणस्य अधिकारं तावेव चक्राते इत्यन्वयः॥ २॥

**तावेव पवनर्द्धिं च चक्रतुर्वह्निकर्म च॥**
**ततो देवा विनिर्धूता भ्रष्टराज्याः पराजिताः॥**

(मं० ४॥ श्लो० ३॥)

तावेवेति। तौ प्रसिद्धौ असुरावेव पवनस्य वायोः ऋद्धिं संपदं अर्थादधिकारं चक्रतुः। चः पुनरर्थे। पुनस्तावेव वह्नेरग्नेः कर्म व्यापारं चक्रतुः। चः समुच्चयार्थः। चादन्येषामपि दिवौकसां कर्म चक्रतुरिति। ततस्तदनन्तरम्। ताभ्यामिति शेषः। ताभ्यां विनिर्धूताः स्वर्गाद्दूरीकृताः पराजिताः प्राप्तपराभवाः अत एव भ्रष्टराज्याः भ्रष्टं राज्ञः कर्माधिकारो येषां ते एवंभूताः देवाः आसन्निति शेषः॥ ३॥

**हृताधिकारास्त्रिदशास्ताभ्यां सर्वे निराकृताः॥**
**महासुराभ्यां तां देवीं संस्मरन्त्यपराजिताम्॥**

(मं० ५॥ श्लो० ४॥)

हृतेति। ताभ्यां महद्भ्यामसुराभ्यां हृतः अपहृतः अधिकारो लोकपालत्वादिलक्षणो येषां ते हृताधिकाराः। अत एव निराकृताः निरस्ताः सर्वे तिस्रो जन्मयौवनानाशलक्षणा दशा अवस्था येषां ते

धम्मिल्लः संयतः कस्यां बिभ्राणाधोमुखीं कलाम् ॥ केशान्ते तिलकस्योर्ध्वं दधती सुमनोहरा ॥ मणिकुण्डलसंघृष्टगुणा मुकुटमण्डिता ॥ सज्योतिःकर्णपूराभ्यां कर्णमापूर्य संगता । सुवर्णमणिमाणिक्यनागहारविराजिता ॥ सदा सुगन्धिभिः पुष्पैरम्लानैरतिसुन्दरी । मालां बिभर्ति ग्रीवायां रत्नकेयूरधारिणी ॥ मृणालायतवर्णैस्तु बाहुभिः कोमलैः शुभैः । राजन्ती कञ्चुकोपेतपीनोन्नतपयोधरा ॥ क्षीणमध्या पीतवस्त्रा त्रिवलीप्रतिभूषिता । शूलं वज्रं च बाणं च खड्गं शक्तिं तथैव च ॥ दक्षिणैः पाणिभिर्देवी गृहीत्वा तु विराजिता। गदां घण्टां च चापं च चर्म शंखं तथैव च ॥ ऊर्ध्वादिक्रमतो देवी दधती वामपाणिभिः । सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्मणि कौशिकी ॥ बिभ्रती रूपमतुलं ससुरासुरमोहनम् । एतस्याः शृणु वत्स त्वं याःपूज्यास्त्वष्टयोगिनीः ॥ ताः पूजिताश्च कुर्वन्ति चतुर्वर्गं नृणां सदा । ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा ॥ कौमारी वैष्णवी चैव वाराही च तथा स्मृता । नारसिंही तथैवैन्द्री शिवदूती तथाष्टमी ॥ एताः पूज्या महाभागा योगिनीः कामदायिनीः । देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता ॥ तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव । समाक्षिसहितो दन्त्यः प्रान्त्यस्तस्मात्पुरस्सरः ॥ षष्ठस्वराग्निबिन्दुभ्यां सहितः सादिरेव वा । कालीतन्त्रमिति प्रोक्तं धर्मकामार्थसाधकम् ॥ एतां मूर्तिं प्रवक्ष्यामि वत्सैकाग्रमनाः शृणु । नीलोत्पलदलश्यामा चतुर्वर्गसमन्विता ॥ खट्वाङ्गं चन्द्रहासं च बिभ्रती दक्षिणे करे । वामे चर्म च पाशं च ऊर्ध्वाधो भागतः पुनः ॥ दधती मुण्डमालां च व्याघ्रचर्मवराम्बरा । कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ॥ लोलजिह्वा निम्नरक्तनयनैरति भैरवा । कबन्धवाहना नीलविस्तारश्रवणानना ॥ एषा ताराह्वया देवी

कालिकाजिघृक्षया धूम्रलोचनचण्डमुण्डरक्तबीजादयो हिमाचले देव्या मुमुधुरेकत्र । धूम्रलोचनः कालिकया हूंकारेण भस्मीकृतः । चण्डमुण्डावपि कालिकाललाटफलकादुत्पन्नया काल्या निहितौ । शिवदूत्यपि कालिकात एवाविर्भूतैव कालिकयैव शुम्भनिशुम्भौ हताविति शंतनुप्रभृतय आहुः । परे तु स्तोत्रं समेतत्क्रियते शुम्भदैत्यनिराकृतैरिति मार्कण्डेयपुराणे कौशिकीवचनेन शुम्भो निशुम्भो ह्यसुरौ वाधेते सकलान्सुरान् तस्मात्तयोर्वधायाहं स्तूयेऽत्र सकलैः सुरैरिति कालिकापुराणे कौशिकीवचनेन चैकवाक्यत्वात्कौशिक्यैव धूम्रलोचनो भस्मीकृतः । चण्डमुण्डावपि कौशिक्या एव ललाटफलकादुत्पन्नया काल्या निहतौ । तथाहि । ततोऽम्बिका परं रूपं बिभ्राणां सुमनोहरमित्यत्र सुमनोहरं रूपं बिभ्राणा कौशिक्येव चण्डमुण्डाभ्यां दृष्टा न कालिका । तस्या उग्रतारास्वरूपतया घोररूपत्वस्योक्तकालिकापुराणीयवचनेनैव प्रतिपादितम् । शक्तिरत्युग्रा शिवाशतनिनादिनीत्यादिना कालिकायाः सुमनोहररूपाभावात् कौशिक्या एव सुमनोहररूपस्य नैतस्याः सदृशी मर्त्या चारुरूपेण विद्यते त्रिषु लोकेषु कान्त्या वा नास्यास्तुल्या भविष्यतीत्यादिना विस्तरतः कालिकापुराण एव प्रतिपादितत्वाच्च । चण्डमुण्डवधार्थं काल्यपि कौशिक्या एव ललाटफलकादुत्पन्ना । कालिकापुराणे कौशिकीवर्णनसमनन्तरमेव देव्या ललाटनिष्क्रान्ता या कालीत्यभिविश्रुतेत्यादिना सपरिकरकालीवर्णनात्कौशिक्या एव काल्युत्पत्तेरभिशब्दितत्वात् । एवं ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा चण्डिका प्रतिपादिता शिवदूत्यपि कौशिक्या एव शरीरादुत्पन्नायाः कालिकायाः कालिकापुराणे कौशिक्या हृदयाद्देवी निःसृता ध्यायतो हरेः । शिवदूतीति साख्याता या च फेरुशतैर्वृतेत्यादिना स्पष्टमेव कौशिकीत

एव शिवदूत्या उत्पत्तेः प्रतिपादितत्वात् । एवं रक्तबीजोऽपि कौशिक्यैव हतः । यदा जघान जगतां रक्तबीजं हिताय वै । महादेवी महामत्ता तदास्याः कायनिःसृता ॥ दूतं प्रस्थापयामास शिवं शुम्भाय चाम्बिका । तेन सा शिवदूतीति देवैः सर्वैः प्रगीयते ॥ इत्यादिना कालिकापुराण एव रक्तबीजहन्तृत्वस्य कौशिक्या एव प्रतिपादितत्वात् । शुम्भनिशुम्भावपि कौशिक्यैव हतौ न कालिकया । तथाहि ब्रह्माणी वैष्णव्यादिमातरो हि कौशिक्या एव सहायभूता रक्तबीजवधे वर्णिताः ताभिरेव मातृभिः सह युद्धभूमौ स्थितया कौशिक्यैव देव्या निशुम्भे निहते, शुम्भेन अन्यासां बलमाश्रित्य युध्यसे यातिमानिनीति देवीं प्रत्युक्ते एकैवाहं जगत्यत्र द्वितीया का ममापरा । पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः इति देव्या शुम्भं प्रत्युक्त्वा ब्रह्माणी प्रमुखालयम् नीतासु कौशिक्या एवावस्थानस्य युक्तत्वात् कालिकापुराण एव ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा । कौमारी वैष्णवी चैव वाराही च तथा स्मृता ॥ नारसिंही तथैवैन्द्री शिवदूती तथाष्टमीत्यादिना ब्रह्माण्यादिमातॄणां कौशिक्या एवावरणदेवतात्वेन स्पष्टमेव वर्णनाच्च कालिकायाश्चोग्रतारारूपायाः महाकाल्यथ रुद्राणी नग्ना भीमा तथैव च । घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी ॥ भैरवी चाष्टमी प्रोक्तेत्यादिना आवरणस्य वर्णनात् । तदेवं कौशिकीचरितमेव शुम्भनिशुम्भवधपर्यन्तं कालीशिवदूत्याद्यास्तदीया एव शक्तयो न कालिकाया इत्याहुः । युक्तं चैतत् । वामनपुराणेऽपि जन्मत एव श्यामवर्णा पार्वती कालीति रुद्रेणोक्ता स्वापमानं मन्यमाना रुद्रं विहाय हिमाद्रिशिखरे स्रष्टारमाराध्य गौरीभावं वव्रे । तथेत्युक्त्वा गतो ब्रह्मा पार्वती चाभवत्ततः । सेशं कृष्णं परित्यज्य पद्मकिंजल्कसप्रभा । तस्मात्कोशाच्च संजाता भूयः कात्यायनी मुने । तामभ्येत्य

सहस्राक्षः प्रतिजग्राह दक्षिणाम् । प्रोवाच गिरिजां देवो वाक्यं स्वार्थाय वासवः । इयं मदीयता मह्यं भगिनी मेऽस्तु कौशिकी । त्वत्कोशसंभवा चेयं कौशिकी कौशिकोऽप्यहम् ॥ तां प्रादादिति संश्रुत्य कौशिकीं रूपसंयुताम् । ततस्तां पर्वतस्थां दृष्ट्वा चण्डमुण्डाभ्यां शुम्भाय स्त्रीयं गृह्यतामित्युक्ते कौशिक्येव शुम्भाय निवेदिता तदाचचक्षे । शुम्भाय निशुम्भायाथ कौशिकीमित्यादिना वामनपुराण एव निरूपणात् । धूम्रलोचनोऽपि कौशिक्यैव हतः । तमायान्तं च सगदं हुंकारेणैव कौशिकी । सबलं भस्मसाच्चक्रे शुष्कमग्निरिवेन्धनमित्यादि वामनपुराणवचनात् । चण्डमुण्डावपि कौशिकीमुद्दिश्यैव गतौ । अथादिदेश बलिनौ चण्डमुण्डौ महासुरौ । रुरुं च बलिनां श्रेष्ठं तेऽप्याजग्मुर्मुदान्विताः । तेषां च सैन्यमतुलं गजाश्वरथसंकुलम् । समाजं नाम सहसा यत्रास्ते कोशसंभवेत्यादिना तत्रैव निरूपितत्वात् । एवं काल्यपि कौशिक्या एव ललाटादाविर्भूता । तावापतन्तौ रौद्रौ वै दृष्ट्वा क्रोधपरिप्लुता । त्रिशिखां भृकुटीं वक्त्रे चकार परमेश्वरी । भृकुटीकुटिलाद्देव्या ललाटफलकादद्भुतम् । कालीकरालवदना निःसृता योगिनी शुभा । खट्वाङ्गमादाय करेण रौद्रमसिं च कालाङ्गमकोशमुग्रम् । संशुष्कगात्रा रुधिराप्लुताङ्गी नरेन्द्र मूर्धस्रजमुद्वहन्तीत्यादिना कौशिकीत एव काल्युत्पत्तेस्तत्रैव निरूपणात् । एवं शिवदूत्यपि कौशिकीत एवाविर्भूता । रक्तबीजोऽपि कौशिक्यैव निहतः । महाप्रबन्धेन वामनपुराण एव तथा वर्णनात् । एवं शुम्भनिशुम्भावपि कौशिक्यैव निहतौ । श्रुत्वा स वाक्यं कौशिक्या दानवः सुविषादि च । प्रोवाच चिन्तयित्वाथ वचनं वदतां वरमित्यादिना वामनपुराण एव तथा वर्णनात् । न च शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ । नन्दगोपगृहे जाता यशोदागर्भसंभवा । ततस्तौ नाशयिष्यामि विन्ध्याच-

लनिवासिनीति भगवतीप्रतिज्ञातशुम्भनिशुम्भान्तरविषयिणी वामनपुराणकथा मार्कण्डेयान्तर्गतशुम्भनिशुम्भवधप्रस्तावरचापि देवीविषय इति वाच्यम्। वामनपुराणेऽपि शुम्भनिशुम्भवधानन्तरं देवैः सुतया कौशिक्यैव भूयो भविष्यामि सुरारिगुत्तमं संभूय नन्दस्य गृहे यशोदया। तं विप्रचित्तिं सगणौ तथापरौ शुम्भं निशुम्भं दशनप्रहारिणीत्यादिना वामनपुराणेऽपि भविष्यन्नन्दसुतावतारस्य भविष्यच्छुम्भनिशुम्भवधार्थं कौशिक्यैव प्रतिज्ञातमित्ययं निर्गलितार्थः। दूतसंवादाध्यायमारभ्य देववरपर्यन्तं सर्वं कौशिकीचरितमेव शक्त्यन्तरं च तत्सहायभूतमुग्रतारापर्यायकालिका च हिमाचले स्थितोदासीनभावेनेति निर्णयः। मार्कण्डेयपुराणे हिमाचले शुम्भनिशुम्भौ निहतौ वामनपुराणे विन्ध्ये तौ निहतावित्येतावन्मात्रं तु कल्पभेदनिबन्धनमिति वेदितव्यम् ॥ ४० ॥

तस्यां विनिर्गतायां तु कृष्णाभूत्सापि पार्वती ॥
कालिकेति समाख्याता हिमाचलकृताश्रया ॥

(मं० ८८ ॥ श्लो० ४१ ॥)

तस्यामिति। सा पार्वत्यपि स्वशरीरकोशात्तस्यां निर्गतायां सत्यां कृष्णः वर्णोऽस्या अस्तीति कृष्णवर्णा अभूत् जाता। अत एव कालिकेति समाख्याता। कालः कृष्णो वर्णस्तत्प्रधाना काली। वर्णार्थात्कालशब्दात्तद्धति वर्तमानात्स्त्रियां जानपदेति सूत्रेण ङीप्। ततः संज्ञायां कन्। केण इति ह्रस्वः। इतिशब्दः शब्दस्वरूपपरः। समाख्याता सम्यक् कथिता हिमप्रधानोऽचलः पर्वतः तस्मिन्कृतः आश्रयो यया। एवंभूता अभूत्। एषैव कालिका। यदुक्तं कालिकापुराणे। विनिःसृतायां देव्यां तु मातङ्ग्याः कायकोशतः। भिन्नाञ्जननिभा कृष्णा साभूद् गौरी क्षणादपि ॥

बलेनाभिभवति स मे भर्त्ता पतिर्भविष्यतीत्येकः पक्षः । यः मे मम दर्पं बलाभिमानं अयुद्धेनैव व्यपोहति शमयति स मे भर्त्ता भविष्यतीति द्वितीयः पक्षः । अयुद्धेन दर्पोपशमो यथा दाशरथिना रामेण जामदग्न्यस्य । यो लोके भुवने प्रतिबलः समानसामर्थ्यः स मे भर्त्ता भविष्यतीति तृतीयः पक्षः । पूर्वपूर्वपक्षाभिभवे सति सर्वे पक्षाः दूतप्रतारणार्थाः । असंभवत्वात्सत्या अपि ॥ ६९ ॥

**तदागच्छतु शुम्भोऽत्र निशुम्भो वा महासुरः ॥**
**मां जित्वा किं चिरेणात्र पाणिं गृह्णातु मे लघु ॥**
(मं० १२१ ॥ श्लो० ७० ॥)

तदिति । यद्यस्मान्मज्जयमन्तरेण मत्प्राप्तिर्दुर्लभा तत्तस्मादत्र हिमाद्रिशिखरे महासुरः शुम्भो निशुम्भो वा आगच्छतु अत्र विषये चिरेण चिरकालेन विलम्बेन किं लघु शीघ्रं मां जित्वा अभिभूय मे पाणिं हस्तं गृह्णातु विवाहं करोतु । इति वाक्यं दूतप्रतारणं सत्यं चेति । पणायन्त्यनेनेति पाणिः । पण व्यवहारे । आशिपणाय्यो रुडायलुकौ चेति इण् आयप्रत्ययस्य लुक् च । पञ्चशाखः शयः पाणिरित्यमरः ॥ ७० ॥

**दूतउवाच ॥ मं० १२२ ॥**

**अवलिप्तासि मैवं त्वं देवि ब्रूहि ममाग्रतः ॥**
**त्रैलोक्ये कःपुमाँस्तिष्ठेदग्रे शुम्भनिशुम्भयोः ॥**
(मं० १२३ ॥ श्लो० ७१ ॥)

अवलिप्तासीति । हे देवि द्युतिमति । त्वं अवलिप्तासि स्तब्धासि । एवं मां यो जयतीति प्रकारकं वाक्यं मम अग्रतः पुरः मा ब्रूहि । शुम्भनिशुम्भयोरग्रे त्रैलोक्ये कः पुमान् योद्धुं तिष्ठेन्न कोऽपीत्यर्थः ॥ ७१ ॥

शरवर्षैरिति । बिभ्यत्येभ्य इति भीमानि दारुणानि । भीमादयोऽपादाने इति भियो मक्कि भियः षुग्वेत्यस्य वैकल्पिकत्वात् षुगभावे रूपम् । भीमो वृकोदरे घोरे शंकरेऽम्लवेतसे इति हैमः । महान्तश्च ते भीमाश्च महाभीमाः । तैः शराणां वाणानां वर्षैः वृष्टिभिरिव वर्षैरखण्डधाराभिः सहस्रशः सहस्रसंख्याकैः क्षिप्तैः प्रेषितैश्चक्रैः लोहनिर्मितैरायुधविशेषैश्च मुण्डः मुण्डनामा दैत्यः तां प्रसिद्धाम् । भीमे घोरे अक्षिणी यस्याः तां कालीं छादयामास । आवृतां चकारेत्यर्थः ॥ १६ ॥

**तानि चक्राण्यनेकानि विशमानानि तन्मुखम् ॥**
**बभुर्यथार्कबिम्बानि सुबहूनि घनोदरम् ॥**

( मं० १८ ॥ श्लो० १७ ॥ )

तानीति । अनेकानि बहूनि तस्याः काल्याः मुखं विशमानानि प्रविशमानानि तानि मुण्डक्षिप्तानि चक्राणि कर्तृभूतानि बभुः शुशुभिरे । तत्रोपमा । अर्च्यन्त इत्यर्काः सूर्याः । अर्च पूजायाम् । कर्मणि घञ् । चजोरिति कुत्वम् । सुबहूनि अर्काणां बिम्बानि मण्डलानि घनानां मेघानामुदरं विशमानानि यथा तद्वच्चाकचिक्यादिभाञ्जि चक्राणि तन्मुखं विशमानानि बभुरित्यन्वयः । अभूतोपमेयम् । अत्र शानच् छान्दसः । उदरमिति जठरम् । ऋ गतावुत्पूर्व अच् । उदृच्छति उदियर्त्ति वा उदरम् । उदरं तुन्दरणयोरिति हैमः । उदरशब्द उपचारान्मध्यमाह ॥ १७ ॥

**ततो जहासातिरुषा भीमं भैरवनादिनी ॥**
**काली करालवक्त्रान्तर्दुर्दर्शदशनोज्ज्वला ॥**

( मं० १९ ॥ श्लो० १८ ॥ )

तत इति । शरवर्षचक्रक्षेपानन्तरं भैरवं भीषणं नदितुं शीलं

## अथाष्टमाध्यायारम्भः ।

तत्राष्टमाध्यायमन्त्रविभागो यथा चिदम्बररहस्ये । सार्धैकषष्टिश्लोकाढ्येऽष्टमेऽध्याये मनूञ्शृणु । आद्य ऋषिश्चैकषष्टिश्लोकमन्त्राः प्रकीर्तिताः ॥ १ ॥ ततोऽर्धश्लोकरूपश्च त्रिषष्टिर्मन्त्रसंततिः । रक्ताक्षी देवता चाष्टौ देव्यस्तु परिकीर्तिताः ॥ अष्टौ देव्यो ब्राह्मयाद्या इति ।

### ऋषिरुवाच ॥ मं० १ ॥

ऋषिः सुमेधाः सविस्तरं रक्तबीजवधं कथयन्सुरथमुवाच–

**चण्डे च निहते दैत्ये मुण्डे च विनिपातिते ॥**
**बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वरः ॥**

(मं० २ ॥ श्लो० १ ॥)

**ततः कोपपराधीनचेताः शुम्भः प्रतापवान् ॥**
**उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह ॥**

(मं० ३ ॥ श्लो० २ ॥)

चण्डेति युग्मेनान्वयः । चण्डे दैत्ये देव्या निहते सति मुण्डे मुण्डनाम्नि दैत्ये देव्या निहते सति तुल्ययोगताप्रतिपादनार्थं चकारद्वयम् । च पुनः । बहुलेषु सैन्येषु सेनासु क्षयः संजातमेषामिति क्षयिताः संजातनाशाः तेषु सत्सु क्षयं प्रापितेषु वा । ततः तद्वृत्तान्तप्राप्त्यनन्तरम् । असुराणामीश्वरः प्रभुः कोपेन पराधीनमस्वाधीनं चेतो यस्य सः । प्रतापयत्यनेनेति प्रतापः स्वभावः । तप संतापे ण्यन्तः । पुंसीति घः । प्रतपनं वा प्रतापः । भावे घञ् । प्रतापोऽस्येति प्रतापवान् । शुम्भः दैत्यानां यानि सर्वाणि सैन्यानि

कुलिशेनाहतस्याशु तस्य सुस्राव शोणितम् ॥
समुत्तस्थुस्ततो योधास्तद्रूपास्तत्पराक्रमाः ॥

( मं० ४३ ॥ श्लो० ४२ ॥ )

कुलिशेनेति । ऐन्द्र्याक्षिप्तेन कुलिशेन वज्रेण करणेन आहतस्य ताडितस्य तस्य रक्तबीजस्य । शरीरत इति शेषः । रक्तबीज संबन्धि वा शोणितं कर्तृ आशु शीघ्रं सुस्राव प्राभ्रश्यत । ततस्तस्मादेव शोणिताद्रक्तबीजस्येव रूपमाकृतिर्येषां ते तद्रूपाः । तथा तत्तथैव रक्तबीजस्येव पराक्रमो येषां ते तत्पराक्रमाः । योधा योद्धारः । रक्तबीजसदृशाकारपराक्रमाः समुत्तस्थुः उपस्थिता बभूवुः । तत्सदृशा इति वक्तव्ये तद्रूपास्तत्पराक्रमा इत्युक्त्या च रक्तबीजस्य रक्तबीजरक्तोत्पन्नानामसुराणां च कश्चिद्विशेषो ध्वन्यते । तथाहि । रक्तबीजरुधिरादसुरा उत्पद्यन्ते । रक्तबीजरक्तजासुराणां रक्तात्तु केचिदुत्पद्यन्ते इति । सुस्रावेति । स्रु गतौ अकर्मकः दन्त्यादिः । परोक्षे लिट् । कुलिशेनाहतस्य रक्तबीजस्य शोणितं कर्तृ सुस्रावेत्यकर्मकत्वं घटात्पयः स्रवतीतिवत्कर्मनिरपेक्षस्यावसेयम् । घटः स्रवतीत्यादौ प्रसिद्धेरकर्मकत्वम् । तदुक्तं-धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात् ॥ प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रियेति । शौर्योद्योगौ पराक्रमावित्यमरः ॥ ४२ ॥

यावन्तः पतितास्तस्य शरीराद्रक्तबिन्दवः ॥
तावन्तः पुरुषा जातास्तद्वीर्यबलविक्रमाः ॥

( मं० ४४ ॥ श्लो० ४३ ॥ )

यावन्त इति । तस्य रक्तबीजस्य शरीरात् यावन्तः यत्परिमाणाः यत्संख्याका रक्तबिन्दवः पतिताः । भूमाविति शेषः । तावन्त एव तत्परिमाणसंख्याका एव रक्तबीजस्येव वीर्यं प्रभावः बलं

**सहस्रशो जगद्व्याप्तं तत्प्रमाणैर्महासुरैः ॥**

( मं० ४८ ॥ श्लो० ४७ ॥ )

वैष्णवीति । वैष्णव्याश्चक्रेणायुधेन भिन्नस्य दारितस्य रक्तवीजस्य रुधिरस्य स्रवणं स्रावः प्रवाहरूपेण प्रवृत्तिः तस्मात्संभव उत्पत्तिर्येषां तैः सहस्रेण सहस्रेणेति सहस्रशः वीप्सया असंख्यातैर्महासुरैः जगद्भुवनं व्याप्तं व्याकीर्णमासीदित्यन्वयः । सहस्रश इत्यत्र संख्यैकवचनाच्च वीप्सायामिति शस् ॥ ४७ ॥

**शक्त्या जघान कौमारी वाराही च तथासिना ॥**
**माहेश्वरी त्रिशूलेन रक्तवीजं महासुरम् ॥**

( मं० ४९ ॥ श्लो० ४८ ॥ )

शक्त्येति । कुमारस्य कार्तिकेयस्येयं शक्तिः कौमारी शक्त्या आयुधेन महासुरं रक्तवीजं जघान जिहिंस । तथा वराहस्येयं वाराही शक्तिरसिना खड्गेन रक्तवीजं जघान । वराहरूपतया यज्ञवराहशक्तेः खड्गधारणं न संभवतीति न शङ्कनीयम् । तस्या वदनस्यैव वराहवदनुकारितया करचरणादेर्मानुषावयवतुल्यतायाः सकलपुराणप्रसिद्धत्वात् । महेश्वरस्य रुद्रस्येयं माहेश्वरी शक्तिस्त्रिशूलेनायुधेन रक्तवीजं जघानेत्यन्वयः ॥ ४८ ॥

शक्तिभिराकुलीकृतस्यापि रक्तवीजस्य विक्रममाह—

**स चापि गदया दैत्यः सर्वा एवाहनत्पृथक् ॥**
**मातॄः कोपसमाविष्टो रक्तवीजो महासुरः ॥**

( मं० ५० ॥ श्लो० ४९ ॥ )

स चापीति । च पुनः । सोऽपि रक्तवीजः दैत्योऽपि कोपेन क्रोधेन समाविष्टो युक्तः सन् सर्वा एव मातॄः ब्राह्मयाद्याः शक्तीः पृथक् पृथक् प्रत्येकं गदया अहनत् अताडयत् । किंभूतो रक्तवीजः । असू-

गृहीतेति । गृहीतमुग्रं रौद्रं महाचक्रं सुदर्शनाख्यमायुधं यया तत्संबुद्धौ गृहीतोग्रमहाचक्रे । तथा दश्यते अनयेति दंष्ट्रा विषाणम् । दंश दशने । दाम्नीत्यादिना ष्ट्रन् । तया उद्धृता ऊर्ध्वे धृता, वसु द्रव्यं धारयतीति वसुंधरा पृथिवी यया तत्संबुद्धौ हे दंष्ट्रोद्धृतवसुंधरे । धृञ् धारणे ण्यन्तः । संज्ञायां भृतृवृजीति खच् । खचि ह्रस्वः । वसुधोर्वी वसुंधरेत्यमरः । तथा वराहस्य सूकरावतारस्य विष्णोः रूपं आकारोऽस्त्यस्या इति वराहरूपिणी । अत इनठनावितीनन्तादृन्नेभ्यो ङीप् । तथा शिवे सर्वमङ्गले । तथा हे नारायणि ते तुभ्यं नमोऽस्तु ॥ १६ ॥

**नृसिंहरूपेणोग्रेण हन्तुं दैत्यान्कृतोद्यमे ॥**
**त्रैलोक्यत्राणसहिते नारायणि नमोऽस्तु ते ॥**

( मं० १८ ॥ श्लो० १७ ॥ )

नृसिंहरूपेणेति । उग्रेण उत्कटेन । ना पुरुषः सिंह इव नृसिंहः । उपमितमिति समासः । पुरुषसिंहार्धकायत्वान्नृसिंहो विष्णोरवतारविशेषस्तस्य रूपेणाकारेण दैत्यान् हन्तुं कृतः उद्यमः उद्योगो यया सा तथाभूते हे देवि । तथा त्रयो लोकास्त्रैलोक्यम् । चतुर्वर्णादित्वात्स्वार्थे ष्यञ् । तस्य त्राणं रक्षणम् । त्रैङ् पालने । नुदविदोन्दत्रेति निष्ठानत्वम् । त्रैलोक्यत्राणाय सहिते हिताभिः इष्टाभ्युदयवाञ्छाशीलाभिः सह वर्तमाने । यद्वा हितैः इष्टाभ्युदयवाञ्छाशीलैर्देवैः सह वर्त्तमाने । हितं पथ्ये गते धृते इति हैमः । हे नारायणि ते तुभ्यं नमोऽस्तु ॥ १७ ॥

**किरीटिनि महावज्रे सहस्रनयनोज्ज्वले ॥**
**वृत्रप्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥**

( मं० १९ ॥ श्लो० १८ ॥ )

शब्दव्यवच्छेदाल्लभ्यते । पुनरनन्तरं द्वौ मन्त्रौ । वभूत्रान्तर्हिता अद्य इत्येकश्लोकात्मक एको मन्त्रः । सूर्याज्जन्म समासाद्येत्यर्धश्लोकात्मकोऽपरो मन्त्रः । तौ द्वौ मन्त्रावुच्चार्यान्ते सावर्णिर्भविताममनुरित्येकपादात्मकं मन्त्रमन्ते पुनरावर्तयेदिति शेषः । तदावर्तनं ग्रन्थसमाप्तिसूचकं न त्वस्याहुतिरित्यर्थः । यदुक्तं कात्यायनीतन्त्रे— इति दत्त्वेत्यर्धमन्त्रो वाञ्छितार्थप्रपूरणे इति । एवं त्रयोदशाऽध्याये होमतर्पणकर्मणि ॥ ६ ॥ शतानि सप्तसंख्यानि प्रोक्तानि तव शैलजे । यकारादिलुकारान्तो मनुः परमदुर्लभः ॥ ७ ॥ सत्संप्रदाय विधिना ज्ञातव्यो मम वल्लभे । अन्यथा विफलो मन्त्रः सत्यं सत्यं मयोदितम् ॥ ८ ॥ इत्थं सप्तशतीदेवी ज्वलद्वह्निर्न संशयः । सुरक्षिता सुखाय स्यादन्यथा गृहदाहकृदिति ॥ ९ ॥

## ऋषिरुवाच ॥ मं० १ ॥

श्रीमद्भगवत्याश्चरितत्रयरूपस्तोत्रसामर्थ्यं निजभक्तेषु कृपालुतां तस्या एव वाक्यद्वारा समुपवर्ण्य सुरथवैश्ययोरभीष्टप्राप्तिकमुपदेशं व्यञ्जयन्भगवान्सुमेधा ऋषिः सुरथं राजानमुचितमुपदेक्ष्यन्नुवाच—

**एतत्ते कथितं भूप देवीमाहात्म्यमुत्तमम् ॥**
**एवंप्रभावा सा देवी ययेदं धार्यते जगत् ॥**

(मं० २ ॥ श्लो० १ ॥)

एतदिति । हे भूप, मया सुमेधसा एतच्चरित्रत्रयात्मकमुत्तमं श्रेष्ठं पुरुषार्थचतुष्टयपूरकत्वात् । देव्याः चिच्छक्तेः माहात्म्यं ते तुभ्यं कथितं यया देव्या इदं जगत् धार्यते अवस्थाप्यते आधारशक्तिरूपत्वात्सा देवी महामाया, एवं उक्तः प्रभावो यस्याः सा

४ अथान्यजन्मनि राज्यलाभाय प्रार्थिता देव्युत्तरमाह-

**मृतश्च भूयः संप्राप्य जन्मदेवाद्विवस्वतः ॥**

( मं० २२ ॥ श्लो० १४ ॥ )

**सावर्णिको मनुर्नाम भवान्भुवि भविष्यति ॥**

॥ मं० २३ ॥

मृत इति । हे सुरथ, आयुषोऽवसाने मृतस्त्यक्तसुरथाख्यदेहः भूयः पुनरपि विवस्वतः सूर्यदेवात् सवर्णायाश्च तत्पत्न्याः जन उत्पत्तिं संप्राप्य लब्ध्वा सावर्णिरेव सावर्णिकः स्वार्थे कः । मः साग्रैकसप्ततिचतुर्युगकालपर्यन्तं धर्मप्रवर्तको भूत्वा मन्वन्तराग्रगण भुवि भूमौ भवान् भविष्यति । नामेति प्रसिद्धौ ॥ १४ ॥

एवमभ्यर्थितं वरं राज्ञे दत्त्वा देवी वरं दातुं समाधिमप्याह-

**वैश्यवर्य त्वया यश्च वरोस्मत्तोऽभिवाञ्छितः ॥**

( मं० २४ ॥ श्लो० १५ ॥ )

**तं प्रयच्छामि संसिद्ध्यै तव ज्ञानं भविष्यति ॥**

॥ मं० २५ ॥

वैश्यवर्येति । हे वैश्यवर्य वैश्यवंशश्रेष्ठ हे समाधे, त्वयास्मत देवीतः यः वरः अभिवाञ्छितः लब्धुमिष्टः । प्रार्थित इति यावत् । वरं तवाभिलषितं तुभ्यं प्रयच्छामि ददामि संसिद्ध्यै परमात्मरू संगत्यै मोक्षाय तादर्थ्ये चतुर्थी । तव वरप्रार्थयितुः ज्ञानं ब्रह्मस क्षात्कारमोक्षधीः भविष्यति । मोक्षधीर्ज्ञानमुच्यते । सत्यं ज्ञानमनन ब्रह्मेति श्रुतेः । यद्वा अस्मत्त इति पञ्चमीबहुवचनम् । स्वस्य सार्व त्म्यद्योतकमिमि । अतश्चैकत्वाभावात्प्रत्ययोत्तरपदयोश्चेति माद् शाभावः । ननु अस्मत्तः इति बहुवचनोपक्रमात्प्रयच्छाम इति बहु वचनेन भाव्यं तत्कथं प्रयच्छामीत्येकवचनम् । एवं सति अस्मत्त

नेत्रयोर्द्वितये भूप द्वयमन्यत्कपोलयोः ।
श्रुत्योः स्वरद्वयं न्यस्य द्वयं नासापुटद्वये ॥ ५६ ॥
ओष्ठयोर्विन्यसेद्द्वन्द्वं द्वन्द्वं दशनलेखयोः ।
जिह्वायां विन्यसेदेकं तालुस्थाने च तत्परम् ॥ ५७ ॥
विन्यसेत्प्रथमं वर्गं भूपते दक्षिणे करे ।
वामेऽपरं न्यसेद्वर्गं तृतीयं दक्षिणे पदे ॥ ५८ ॥
चतुर्थं वामपादे च पञ्चमं हृदये न्यसेत् ।
शेषाक्षराणां नवकं विन्यसेत्सर्वधातुषु ॥ ५९ ॥
त्वचि रक्ते च मांसे च स्नायुष्वस्थिषु पञ्चमम् ।
मज्जामेदस्सु पूयेषु द्वितयं तत्परं न्यसेत् ॥ ६० ॥
अयं तु मातृकान्यासः प्रथमः परिकीर्त्तितः ।
साङ्गवेदसमो भाति भूषितो येन मान्त्रिकः ॥ ६१ ॥

( पूजानामित्यादिभिर्मान्त्रिकमित्यन्तैः श्लोकैर्मातृकान्यासः । च तन्त्रप्रसिद्धमातृकान्यासतः किञ्चिद्विलक्षणोऽप्यस्मिन्विषये मेव ग्राह्यः । क्षिप्त्वेति । वर्णानां प्रथममादौ शिरः प्रणवम् ते पल्लवं सर्वपल्लवप्राथम्यान्नम इति । अनयोः शिरः पल्लवयो- ये । उपरि शिरसि विन्दुनानुस्वारेण भूषितं वर्णं क्षिप्त्वा प्त्वा प्रोक्तस्थाने न्यसेदित्यर्थः ॥ यथा ॐ अं नमः मूर्ध्नि इत्यादि । सर्वत्र ज्ञेयमिति )

अथ सारस्वतो न्यासो द्वितीयस्ते प्रकथ्यते ।
उक्तमन्त्रस्य सर्वस्य वीजानां देवतार्चने ॥ ६२ ॥
आद्यं वीजत्रयं कृत्वा प्रणवादिनमोऽन्तकम् ।
कनिष्ठादिषु सर्वासु पञ्चस्वङ्गुलिषु न्यसेत् ॥ ६३ ॥
करमध्ये च पृष्ठे च तथैव मणिवन्धयोः ।
हृदि मूर्ध्नि शिखायां च कवचे चक्षुरस्त्रयोः ॥ ६४ ॥

( अर्घ्यपात्रमित्यादिभिः पूजोपकरणप्रोक्षणार्थं पूजार्थं चा पात्रस्थापनमाह । आत्मपूजापि विधेया । तत्पृष्ठोद्भवा मत्स्यमुद्रेति । अनुलोमविलोमाभ्यां मूर्द्धादिपादान्तं पादादिशि ऽन्तं ध्यानमानसपूजान्ते व्यापकत्वेन मूलमुच्चार्य विधेयम् )

षट्कोणचक्रमध्यस्थमध्यबीजे व्यवस्थिताम् ॥ १११ ॥
महाकाल्या सरस्वत्यालङ्कृतां दक्षिणान्ययोः ।
संयुक्तां दक्षिणे वामे सिंहेन महिषेण च ॥ ११२ ॥
अष्टादशभुजां ध्यात्वा महालक्ष्मीं प्रणम्य च ।
पीठादिपूजनं कुर्यात्स्वबीजेन पृथक् पृथक् ॥ ११३ ॥
ॐकारं बिन्दुमध्यस्थनामधेयाद्यमक्षरम् ।
देवतानां स्वबीजं च पूजायामृद्धिसिद्धिदम् ॥ ११४ ॥

( ॐकारेति । नामधेयाद्यमक्षरमिति । ॐकारानन्तरं पीठा तत्तन्नामाद्यक्षरं सबिन्दुकमुच्चार्य्य तदनु चतुर्थीनमोऽन्तेन तत्तन्ना मन्त्रेण पूजयेदित्यर्थः )

ॐकारं प्रथमं पीठं पूर्णपीठमनन्तरम् ।
तृतीयं कामपीठं च पूजयेत्संप्रदायतः ॥ ११५ ॥
पूर्वादिदिक्षु पीठस्य गणेशादिचतुष्टयम् ।
गणेशक्षेत्रपालौ च पादुके वटुकस्तथा ॥ ११६ ॥
आग्नेयादिचतुर्दिक्षु पूज्यं देवीचतुष्टयम् ।
आद्या तत्र जया प्रोक्ता द्वितीया विजया स्मृता ॥ ११७ ॥
जयन्ती तत्परा भूप चतुर्थी चापराजिता ।
पूज्या नामपदैर्देव्यः पीठपङ्कजमध्यगाः ॥ ११८ ॥
प्रागादिक्रमयोगेन पञ्च षट् षट् षडादिकाः ।
प्रथमा विष्णुमाया च द्वितीया चेतना स्मृता ॥ ११९ ॥
बुद्धिर्निद्रा क्षुधा छाया शक्तिस्तृष्णाष्टमी भवेत् ।

तो दश । प्राच्यादिहरितो ज्ञेयाः पूजाहोमादिकर्मस्विति कुलमूला-सतारः । पूज्यपूजकयोर्मध्यं पूर्वमित्यभिधीयते । तदादिपरिवाराणां प्रादक्षिण्येन पूजनमिति दक्षिणामूर्त्तिसंहितायाम् )

अथ षट्कोणार्चा ।

नन्दजा हेमगर्भाभा सुरक्ता रक्तदन्तिका ।
नीला शाकम्भरी दुर्गा सर्वदुःखार्त्तिहारिणी ॥ १३१ ॥
दंष्ट्रार्चितमुखी भीमा नीला पात्रशिरोधरा ।
तेजोमण्डलदुर्धर्षा भ्रामरी वरदार्चिता ॥ १३२ ॥
आद्ये बीजे महाकालीं ध्यानपूर्वां समर्चयेत् ।
द्वितीयेऽष्टादशभुजां महालक्ष्मीं समर्चयेत् ॥ १३३ ॥
तृतीयेऽष्टभुजां ध्यात्वा समभ्यर्च्य सरस्वतीम् ।
ततः पृथक् पृथक् पूजां कृत्वा महिषसिंहयोः ॥ १३४ ॥
मध्यबीजे चिरं ध्यात्वा महालक्ष्मीं महामनाः ।
आह्वानपूर्वकं दद्यादासनं मणिभूषितम् ॥ १३५ ॥
मण्डलस्था तु या देवी पीठस्था सर्वशस्तदा ।
महालक्ष्म्या सहैक्येन चिन्तयेद्योगमुद्रया ॥ १३६ ॥
एकाकारं महालक्ष्म्या रूपं ध्यात्वा परावरम् ।
मुद्रा भुजायुधाकाराश्चण्डिकायै प्रदर्शयेत् ॥ १३७ ॥
अष्टादशाक्षमालाद्यास्ततः पाद्यं समर्पयेत् ।
वारिपुष्पाक्षतैर्युक्तं चन्दनेन प्रमोदितम् ॥ १३८ ॥
अर्घं दत्त्वा महालक्ष्म्यै धेनुमुद्रां प्रदर्शयेत् ।
संकल्प्याचमनं भूप स्नानं पुण्याभिषेचनम् ॥ १३९ ॥
विदध्याच्छ्रेयसीं मुद्रां यया माता प्रतुष्यति ।
महार्हे चित्रिते वस्त्रे चित्राण्याभरणानि च ॥ १४० ॥

( श्रेयसीं मुद्रां योनिमुद्राम् )

तर्पणान्तं कर्म विधायाचम्य प्राणायामं संकल्पं च विधाय प्रागुक्त-नवचण्डिकाविधानवद्दिग्देवीः संपूज्य वलिं दत्त्वा मण्डपे कस्मिं-श्चित्पीठे ग्रहमण्डलं निर्माय तत्र स्वशाखोक्तविधिना नवग्रहान्सं-पूज्य तत्तद्वैदिकमन्त्रैर्लोकपालान्दिक्पालाँश्च संपूज्य वेद्यां प्रागु-क्तविधिना प्रधानकुम्भं संस्थाप्य मण्डपस्य वहिः पूर्वादितो नित्य-पूजाप्रकरणोक्तप्रकारेण चतुर्दिक्षु वलिं भूतादिभ्यो दत्त्वा मण्डपस्य पूर्वादिद्वारचतुष्टये प्रतिद्वारं पूर्वोक्तविधिना द्वौ द्वौ कुम्भौ गालितोद-कपूर्णौ संस्थाप्याचम्य वेद्यां स्वासनमास्तीर्य तत्संपूज्योपविश्य वद्धपद्मासनश्चण्डिकां ध्यात्वा पूजाप्रकरणोक्तक्रमेण भूतशुद्ध्यादिकं विधाय मूलेन प्राणायामत्रयं कृत्वा मूलमन्त्रस्यर्ष्याद्यखिलं न्यास-जातं विधाय प्रधानकुम्भे पीठपूजापुरःसरं चण्डिकामावाह्य सचक्रां साङ्गां सावरणां ध्यात्वा नित्यपूजोक्तविधिनार्घ्यादिस्थापन-पूर्वकं सम्यक्संपूज्य परितोषयेत्। अत्र पूजासामग्री तु अशीतिगुञ्जा-मिता कस्तूरी । तावन्मानं कुङ्कुमम् । तावज्जातीफलम् । तावा-न्कर्पूरः । एतच्चतुष्टयं पलमात्रचन्दनेन घर्षयेत् । तेन पलद्वयमनुले-पनं भवति । पलं तु विंशत्युत्तरत्रिंशद्गुञ्जामितम् । अत्युत्कृष्टं वस्त्रं तु मानानुक्तेः स्त्रीजनपरिधानयोग्यं ग्राह्यम् । गद्याणकत्रयहेमनि-र्मितमलंकरणं तत्तु स्त्रीजनोचितम् । गद्याणकमानं तु लौकिकतो-लकार्धम् । पञ्चविंशतिसहस्राणि पुष्पाणि । पलद्वयं गुग्गुलुः । विंशतिर्दीपा घृतपूरिताः । कुडवद्वयमात्रं हविष्यान्नं नैवेद्यम् । शत-द्वयं नागवल्लीदलम् । तदनुरूपं पूगफलं कर्पूरं खदिरसारादि ग्रा-ह्यम् । इत्थं पूजासामग्रीं संपाद्य नवभिर्ब्राह्मणैः सह महालक्ष्मीं साङ्गां सावरणां संपूज्य आचार्यो ब्राह्मणेभ्यो वहुमानपुरःसरं सप्तशतीपाठार्थमाज्ञां दद्यात् । अत्र यावच्छ्रीदेव्याः पूजनं तावत्सर्वे ब्राह्मणाः जयचण्डीति ब्रुवन्तस्तां ध्यायेयुः । ततस्ते ब्रह्मादयो

रूपां मूलदेवीमावाह्य यथालब्धोपचारैः संपूज्य पूर्वोक्तपुष्पाञ्जलिनवकं नवश्लोकमन्त्रेण समर्प्य पाठाद्यनुष्ठानं समाप्यान्ते ब्राह्मणसुवासिनीबटुककुमार्यादिपूजां पूर्ववत्समापयेदिति शिवम् ।

इति यामलोक्तचण्डिकादीपदानविधिः ।

## अथ संपुटीकरणादिनानाविधप्रयोगाः ।

तत्रादौ संपुटलक्षणं सिद्धेश्वरीतन्त्रे चिदम्बरसंहितायां च—

[1] मन्त्रमादौ वदेत्सर्वं साध्यसंज्ञामनन्तरम् ।
विपरीतं पुनश्चान्ते मन्त्रं तत्संपुटं स्मृतम् ॥ १ ॥
अन्यच्च । मन्त्रमादौ समुच्चार्य ततो नामाखिलं वदेत् ।
अन्ते व्युत्क्रमतो मन्त्रमेष संपुट ईरितः ॥ २ ॥
अथ प्रयोगाश्चिदम्बरसंहितायाम्—
अथ प्रयोगान्वक्ष्यामि चिदम्बरसुभाषितान् ।

---

१ एवमेव संपुटलक्षणं मन्त्रमहोदधावपि । तथा च तद्वाक्यम्—मन्त्रमादौ समुच्चार्य ततो नामाखिलं पठेत् । अन्ते व्युत्क्रमतो मन्त्रमेष संपुट ईरितः ॥ न चात्र व्युत्क्रमोच्चारणे मन्त्रानर्थक्यमिति शङ्कनीयम्, न्यासादौ प्रत्येकवर्णप्रयोगदर्शनेन तदर्थवत्ताभ्युपगमात् । सा चार्थवत्ता प्रकृते प्रकृतिप्रत्ययनिबन्धनेतरापीत्यन्यदेतत् । स्पष्टोऽयमर्थ आगमेषु शिवशक्तिप्रणवाद्यवयवार्थनिरूपणेष्विति दिक् । क्वचित्तु देवीवाक्यम् । संपुटं कतिधा स्वामिन् वेत्तुमिच्छामि तत्त्वतः । कथयस्व सुरेशान यद्यहं तव वल्लभा ॥ ईश्वरः । संपुटं द्विविधं ज्ञेयमुदयास्तकरं प्रिये । शृणूदयं त्वमत्रादौ पश्चादस्तं वदामि ते ॥ मन्त्रमादौ पुनः श्लोकमन्ते मन्त्रं पुनः पठेत् । पुनर्मन्त्रं पुनः श्लोकं क्रमोऽयमुदयः शुभः ॥ उदयोत्कर्षलाभाय संपुटोऽयमुदाहृतः । अस्तं चिकित्साशास्त्रेषु शरावाभ्यां कृतं भवेत् ॥ तत्तेऽहं प्रवदाम्यत्र एकाग्रकृतमानसः । मन्त्रमादौ पुनः श्लोकमन्ते मन्त्रविपर्ययम् ॥ मारणोच्चाटने वन्धे संपुटोऽयमुदाहृतः । इति विशेषोऽपि दृश्यते । वाग्भवाद्येकबीजसंपुटे तु न कोऽपि विशेष इति दिक् ।

सर्वत्र संपुटीकृत्य [1]जातवेदस इत्यृचा ।
शतपाठान्महेशानि सर्वान्कामानवाप्नुयात् ॥ १ ॥
शरणागतदीनार्तमन्त्रस्य संपुटाच्छिवे ।
करोतु सा न इत्यादिपादसंपुटजापनात् ॥ २ ॥
एवं देव्या वरं लब्ध्वा मन्त्रसंपुटितेन वै ।
सर्वकामाप्तिरित्युक्तं श्रीचिदम्बरमूर्तिना ॥ ३ ॥
[2]कांसोस्मि तामृचं देवि संपुटीकरणान्नरः ।
लक्ष्मीवाञ्जायते सद्यः शतपाठान्न संशयः ॥ ४ ॥
दिनान्येकोनपञ्चाशद्रमाबीजेन संपुटम् ।
नित्यं पञ्चदशावृत्तौ लक्ष्मीवान्भवति ध्रुवम् ॥ ५ ॥
इत्युक्ता सा तदा देवीमन्त्रसंपुटजापनात् ।
वाग्बीजसंपुटेनापि विद्यावाञ्शतपाठतः ॥ ६ ॥
ज्ञानिनामपि चेतांसि मन्त्रसंपुटितेन वै ।
शतपाठाद्राजपत्न्यो मोहमेष्यन्ति नान्यथा ।
तन्मन्त्रलक्षजपनात्तदेव हि फलं शिवे ॥ ७ ॥
एकविंशद्दिनं देवि कामबीजेन संपुटम् ।
प्रत्यहं तु दशावृत्त्या राजवश्यं भवेद्ध्रुवम् ॥ ८ ॥
नित्यं त्रिवारादेवं हि चत्वारिंशद्दिनं शिवे ।
एकाधिकं कार्यसिद्धिर्भवेदत्र न संशयः ॥ ९ ॥
इत्थं यदा यदा बाधा संपुट्या शतजापनात् ।
मारीशान्तिर्भवेत्क्षिप्रं नात्र कार्या विचारणा ॥ १० ॥

---

१ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ॥ २ कांसोऽस्मि- १ इति श्रीसूक्ते ।

त्रियम्बकं[1] महामन्त्रं संपुटं शतजापनात् ।
अपमृत्युं हरेदाशु साधको नात्र संशयः ॥ ११ ॥
दुर्गे स्मृतेति मन्त्रेण संपुटीकृत्य पार्वति ।
भवेदत्र न संदेहः सर्वापत्तिनिवारणम् ॥ १२ ॥
शतवारजपेनैव लक्षमन्त्रजपेन वै ।
दुर्गे स्मृतेति मन्त्रस्तु द्विधाकृत्य महेश्वरि ॥ १३ ॥
आद्यमर्धं समुच्चार्य यदन्ति[2] यच्चदूरके ।
ऋचान्ते तूत्तरार्धं तु योजयित्वा प्रयत्नतः ॥ १४ ॥
लक्षसंख्याजपेनैव सर्वापत्तिनिवारणम् ।
हिनस्ति दैत्यतेजांसि मन्त्रं लक्षं तथायुतम् ॥ १५ ॥
सहस्रमथवा जप्त्वा कार्यलाघवगौरवात् ।
घण्टां कांस्यमयीं बद्ध्वा माषभक्तं बलिं चरेत् ॥ १६ ॥
मन्त्रमुच्चार्य तद्घण्टानादं कुर्याद्विचक्षणः ।
तन्नादश्रवणाद्देवि पलायन्ते पिशाचकाः ॥ १७ ॥
रोगानशेषमन्त्रं तु संपुटं विधिनाचरेत् ।
शतवारं महारोगनाशनं भवति ध्रुवम् ॥ १८ ॥
मन्त्रलक्षजपेनैव रोगनाशो भवेद्ध्रुवम् ।
सर्वाबाधाप्रशमनं संपुट्या शतवारकम् ॥ १९ ॥
पठनाद्वैरिनाशः स्यात्तथा लक्षजपादपि ।
भगवत्या कृतं सर्वमित्यादिद्वादशोत्तरः ॥ २० ॥
शताक्षरो महामन्त्रो लक्षमावर्तयेद्व्रती ।
सर्वे कामाश्च सिध्यन्ति सर्वापत्तिनिवारणम् ॥ २१ ॥
देवि प्रपन्नार्तिमन्त्रं पूर्ववत्परिकीर्तितम् ।

---

१ त्रियम्बकमिति छान्दस इयङ् । ऋग्वेदादिपाठे तु यण् दृश्यते
२ 'यदन्ति' इति ऋङ्मन्त्रोऽग्रे लिखितः ।

रिति ॥ व्याहृतित्रययुतां गायत्रीं प्रतिश्लोकमादावन्ते च पठेन्मन्त्रसिद्धिरिति ॥ प्रतिश्लोकमादावन्ते च जातवेदस इत्यृचं पठेन्मन्त्रसिद्धिरिति ॥ प्राण इति ऋचं प्रतिश्लोकं पठेत्सर्वकार्यसिद्धिरिति ॥ प्राणऋचस्तु । ॐ प्राणाय स्वाहा अपानाय स्वाहा व्यानाय स्वाहा अम्बेअम्बिकेऽम्बालिके न मानयति कश्चन ससस्त्यश्वकः सुभद्रिकां काम्पीलवासिनीमिति ॥ आवृत्तिमनुलोमेन त्रयोदशाध्यायान्पठित्वा ततो विपरीतक्रमेण द्वितीयां पठित्वा पुनरनुलोमेन तृतीयामित्येवमावृत्तित्रयेण उक्तेषु प्रकारेषु शीघ्रं कार्यसिद्धिरिति ॥ संतानार्थं संतानगोपालमन्त्रं[1] प्रतिश्लोकं पठेत् । एवमेकचत्वारिंशद्दिनावधि जपेत् । होमतर्पणब्राह्मणभोजनाद्यपि तत्तद्दशांशेन । एवं शतचण्डी सहस्रचण्डी च द्विजद्वारा कृता पुत्राप्तये ॥ अथ लक्ष्मीप्राप्तिप्रकारः ॥ जपेद्बिल्वं समाश्रित्य मासमेकं तु यो नरः । हुत्वा बिल्वदलैर्मासं मधुरत्रययोगतः ॥ हुत्वा दशांशतो वापि कमलैः क्षीरसंयुतैः ॥ धनदेन समां लक्ष्मीं प्राप्नुयादुत्तमां ध्रुवमिति ॥

अथापरः प्रकारः ।

अथाष्टनेत्र २८ प्रमिताक्षरात्मकं विधाय पूर्वं कमलालयामनुम् ॥ पश्चात्तु पूर्वार्धकमेवमुच्चरेद्दुर्गे स्मृतेति प्रथितं मनुं ततः ॥१॥ हिरण्यवर्णामिति पूर्णमन्त्रकं दारिद्र्यदुःखेति ततः परार्धगम् ॥ ततो जपेत्तं कमलालयामनुं रीत्यैनयैकोऽत्र मनुः प्रकीर्त्तितः ॥२॥ एवं मन्त्रन्यासयुक्तिप्रदिष्टा वेद्या लक्ष्मीसूक्तमात्रे व्यवस्था ॥ या चाभ्यस्ता संततं साधकेन्द्रैः सूते लक्ष्मीं दुःखजातं निहन्ति ॥३॥ अथ कमलालयामन्त्रो यथा दक्षिणामूर्त्तिसंहितयाम् । अथ वक्ष्ये

---

१–देवकीसुत गोविन्द वासुदेव जगत्पते ।
देहि मे तनयं कृष्ण त्वामहं शरणं गतः ।

